A.C. Joshi Library
P.U. Chandigarh

MSS No. 179 Subject Language

Name of MSS कुवलयानन्द कारिका Kuvalayānanda Karikā

Author अप्पय्यदीक्षित

Period Not available Folios 10

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios - -

चन्द्रालोकप्रसाद

सर्वालि कर्षेण वर्तते ।

अलंकारेषु बालानामवगाहनसिद्धये ।
लोको विजयतां शारदागमसंभवः ॥ १६३ ॥ हृद्यः कुवलयानंदो यत्प्रसादादयं

नूदयम् ॥ ॥ ॥ इति श्रीमदद्वैतविद्याचार्यश्रीमद्द्विजकुलाधिकोस्तुनश्रीरङ्गरा
जाध्वरीन्द्रवरदसूनारप्पदीक्षितस्य कृतिः कुवयानंदकारिका समाप्ता ॥ ॥ ॥

कुवलयानन्द
कारिका

179

तिषेधःप्रसिद्धस्यनिषेधस्यानुकीर्त्तनम्॥५४॥नद्यूतमेतत्कितवक्रीडनंनि
शितैःशरैः॥सिद्धस्यैवविधानंयत्तदाहुर्विध्यलंकृतिं॥५५॥पञ्चमोदञ्चने
कालेकोकिलोकोकिलोभवेत्॥हेतोर्हेतुमतासार्द्धंवर्णनंहेतुरुच्यते॥
५६॥असावुदेतिशीतांशुर्मानच्छेदायसुभ्रुवां॥हेतुहेतुमतोरैक्यंहेतुंके
चित्प्रचक्षते॥५७॥लक्ष्मीविलासाविदुषांकटाक्षावेंकटप्रभोः॥इत्थंशत
मलंकारालक्षयित्वानिदर्शिताः॥५८॥प्राचामाधुनिकानांचमतान्यालोच्य
सर्वतः॥चत्वारोरसवत्प्रेयऊर्जस्विचसमाहितम्॥५९॥भावस्यचोदयः
संधिःशबलत्वमितित्रयम्॥अष्टौप्रमाणालंकाराःप्रत्यक्षप्रमुखाःक्रमा
त्॥६०॥एवंपञ्चदशान्यानलंकारान्विदुर्बुधाः॥अमुंकुवलयानन्दम
करोदप्पदीक्षितः॥६१॥नियोगाद्वेंकटपतेर्निरुपाधिकृपानिधेः॥चंद्र

अलङ्कार गूढार्थः

कुवलयानन्द कारिका

179

179

कुल पत्र ६, ६,

(25)

कु०२५

॥६॥ श्रीगणेशाय नमः॥ अमरीकवरीभारभ्रमरीमुखरीकृतं॥ दूरीकरोतु दुरितं गौ
२ रीचरणपंकजं॥१॥ परस्परतपःसंपत्फलायितपरस्परौ॥ प्रपंचमातापितरौ प्राञ्चौ
रत्न २ जायापती स्तुमः॥२॥ उत्पाद्य योगकलया हृदयाब्जकोशे धन्यैश्चिरादपि यथा
रुचि गृह्यमाणः। यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुं
दः॥३॥ अलंकारेषु बालानामवगाहनसिद्धये॥ ललितः क्रियते तेषां लक्ष्यलक्ष
को णसंग्रहः॥४॥ येषां चंद्रालोके दृश्यंते लक्ष्यलक्षणश्लोकाः॥ प्रायस्त एव तेषामित
रेषां त्वभिनवा विरच्यंते॥५॥ उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः॥ हंसीव कृ
ष्णते कीर्तिः स्वर्गंगामवगाहते॥६॥ वर्ण्योपमानधर्माणामुपमावाचकस्य च॥ ए
कद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमाष्टधा॥७॥ तडिद्गौरीन्दुतुल्यास्याः कर्पूरन्ती दृ १
शोर्मम॥ कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया॥८॥ यत्तयोर्मेलनं तत्र

ङ्गा भोमे यश्च तद्वते ॥ तदेतत्काकतालीयमवितर्कितसंभवम् ॥९॥ उपमानो
पमेयत्वं यदेकस्यैव वस्तुनः ॥ इंदुरिंदुरिव श्रीमानित्यादौ तदनन्वयः ॥१०॥ प
र्यायेण द्वयोस्तच्चेदुपमानोपमेयता ॥ धर्मोर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि
॥११॥ प्रतीपमुपमानस्य उपमेयत्वकल्पनं ॥ त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो
विधुः ॥१२॥ अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत् ॥ अलं गर्वेण ते वक्त्र का
न्ताचंद्रोपि तादृशः ॥१३॥ वर्ण्योपमेयलाभेन तथान्यस्याप्यनादरः ॥ कः क्रौ
र्यदर्पस्ते मृत्यो त्वत्तुल्याः संति हि स्त्रियः ॥१४॥ वर्ण्येनान्यस्योपमाया अनि
ष्पत्तिवचश्च तत् ॥ मुधापवादो मुग्धाक्षि त्वन्मुखाभं किलांबुजं ॥१५॥ प्रतीप
मुपमानस्य कैमर्थ्यमपि मन्यते ॥ दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिंदुना
॥१६॥ विषय्यभेदताद्रूप्यरंजनं विषयस्य तत् ॥ रूपकं तत्त्रिधाधिक्यन्यून
त्वानुभयोक्तिभिः ॥१७॥ अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात्
अयमास्ते विना शंभुस्तार्तीयीकं विलोचनं ॥१८॥ शंभुर्विश्वमवत्यद्य स्वी
कृत्य समदृष्टितां ॥ अस्या मुखेंदुना लब्धे नेत्रानंदे किमिंदुना ॥१९॥ सा

कु०ग्र० ध्रीयमपरालक्षीर सुधासागरोदिता॥ अयं कलंकिनश्चंद्रान्मुखचंद्रो
त्तिरिच्यते॥२०॥परिणामः क्रियार्थोक्ते हि अयीविषयात्मना॥प्रसन्नेन
२ दृगब्जेन वीक्षते मदिरेक्षणा॥२१॥ वहुभिर्वहुधोल्लेखइष्यते॥ स्त्री
भिःकामोर्थिभिः स्वर्द्रुः कालः शत्रुभिरेक्षितः॥२२॥ एकेन वहुधोल्लेख
प्यसो विषयभेदतः॥ गुरुर्वचस्यर्जुनोयं कीर्तौ भीष्मः शरासने
२३॥स्यात्स्मृतिभ्रांतिसंदेहैस्तदंकालंकृतित्रयम्॥ पंकजं पश्यतः
कांताभुखंमेगाहतेमनः॥२४॥ अयंप्रमत्तमधुपस्त्वन्मुखंवेत्ति पंक
जं॥पंकजंवासुधांशुर्वेत्यस्माकं तु न निर्णयः॥२५॥ शुद्धापह्नुति
रन्यस्यारोपार्थो धर्मनिह्नवः॥ नायंसुधांशुः किं तर्हि व्योमगंगासरो
रुहं॥२६॥ स एव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः॥नेंदुस्तीव्रो न

श्री राम श्री राम श्री राम श्री राम श्री राम श्री राम ७

श्रि॰

मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोपि तादृशः इत्युत्प्रेक्षा

उ की व... ४

निष्पंकः सिंधोरौर्व्वीयमुत्थितः ॥ २७ ॥ अन्यत्र तस्यारोपार्थः पर्यस्तापह्नु
तिस्तु सा ॥ नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखं ॥ २८ ॥ भ्रांतापह्नुतिरन्य
तः २ स्य शंकायां भ्रांतिवारणे ॥ तापं करोति सोत्कंपं ज्वरः किं न सखि स्मरः ॥ २९ ॥
यां ४ छेकापह्नुतिरन्यस्य शंकातस्तथ्यनिह्नवे ॥ प्रजल्पन्मत्पदे लग्नः कांतः किं
न हि नूपुरः ॥ ३० ॥ कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुते पदैः ॥ निर्यांति छ पा व...
स्मरनाराचाः कांतादृक्पातकैतवात् ॥ ३१ ॥ संभावनास्यादुत्प्रेक्षा वस्तुहे
तुफलात्मना ॥ उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदा परा ॥ ३२ ॥ धूमस्तो
धा २ मं तमः शंके कोकीविरहशायिनां ॥ लिंपतीव तमोंगानि वर्षतीवांजनं न
...वीचकवा २ भः ॥ ३३ ॥ रक्तौ तवांघ्री मृदुलौ नु विद्धौ णाद्धुवं ॥ त्वन्मुखाभेच्छया नूनं पद्मे

वि प

कु०२१प्र

वैरायते श्रा शी ॥ ३४ ॥ मध्यः किं कुचयोर्द्वृत्यै वद्धः कनकदामभिः प्रायो ऽनंत्वत्प
दे नैकं प्राप्तुंतायेत पस्यति ॥ ३५ ॥ रूपकातिसयोक्तिः स्यान्निगीर्याध्यवसा
नतः पद्मपनीलोत्पल द्वंद्वान्निः सरंति शिताः शराः ॥ ३६ ॥ यद्यपह्नुतिगर्भ
त्वं सैव सापह्नुवामता ॥ त्वत्सूक्तिषु सुधा राजन्भ्रांताः पद्मंपतिता न्विधौ ॥
॥ ३७ ॥ भेदकातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनं ॥ अन्यदेवास्य गांभीर्य
मन्यद्धैर्यं महीपतेः ॥ ३८ ॥ संबंधातिशयोक्तिः स्यादयोगेयोगकल्पनं ॥
सैधाग्राणि पुरस्यास्य स्पृशंति विधुमंडलं ॥ ३९ ॥ योगेप्ययोगः संबंधा
तिसयोक्तिरितीर्यते ॥ त्वयि दातरि राजेंद्र स्वर्द्रुमान्नाद्रियामहे ॥ ४० ॥ अ
क्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः ॥ आलिंगंति समं देव ज्यां शरा ३
राश्च परारश्च ते ॥ ४१ ॥ चपलातिशयोक्तिस्तु कार्ये हेतु प्रसक्तिजे ॥ यास्यामी

त्सु दिते तन्व्या वलयो न वदूर्मिका ॥ ४२ ॥ अत्यंतातिशयोक्तिस्तु पौर्वापर्यव्य
तिक्रमे ॥ अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ॥ ४३ ॥ वर्ण्यानामितरेषां
वा धर्मैक्यं तुल्ययोगिता ॥ संकुचंति सरोजानि स्वैरिणीवदनानि च ॥ ४४ ॥
त्वदंगमार्दवे दृष्टे कस्य चित्ते न भासते ॥ मालतीशशभृल्लेखाकदलीनां क
ठोरता ॥ ४५ ॥ हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता ॥ प्रदीयते पराभू
तिर्मित्रशात्रवयोस्त्वया ॥ ४६ ॥ गुणोत्कृष्टैः समीकृत्य वचोन्या तुल्ययोगि
ता ॥ लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ॥ ४७ ॥ सिद्धिः ख्यातेषु
चेन्नाम कीर्त्यते तुल्यता क्रये ॥ युवामेवेह विख्यातौ त्वं बलैर्जलधिर्जलैः ॥
४८ ॥ वदंति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः ॥ मदेन भाति कलभः प्रता
पेन महीपतिः ॥ ४९ ॥ त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम् ॥ वर्षत्य

म्बुदमालेयं वर्षत्येषा च शार्वरी ॥५०॥ उन्मीलन्ति कदम्बानि स्फुरंति कुटजो-
द्गमा ॥ माद्यंति चातकास्तृप्ता माद्यंति च शिखावला ॥५१॥ वाक्ययोरेकसा-
मान्ये प्रतिवस्तूपमा मता ॥ तापेन भ्राजते सूरः शूरश्चापेन राजते ॥५२॥ चेद्बि-
म्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृति ॥ त्वमेव कीर्त्तिमान्राजन्विधुरेव हि कां-
तिमान् ॥५३॥ वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना ॥ यद्दातुः सौम्य-
तासेयं पूर्णेंदोरकलंकता ॥५४॥ पदार्थवृत्तिमप्येके वदन्त्यन्यां निदर्शनां ॥
त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः ॥५५॥ अपरां बोधनं प्राहुः क्रिय-
यासत्सदर्थयोः ॥ नश्येद्राजविरोधीति क्षीणं चंद्रोदये तमः ॥५६॥ उदयन्नेव स-
विता पद्मेष्वर्पयति श्रियम् ॥ विभावयन्समृद्धीनां फलं सुहृदनुग्रहम् ॥५७॥
व्यतिरेको विशेषश्चेदुपमानोपमेययोः ॥ शैला इवोन्नताः संतः किंतु प्राकृ- ४

तिकोमलाः ॥५८॥ सहोक्तिः सहभावश्चेद्भासते जनरञ्जनः ॥ दिगन्तमगमत्तस्य की
र्त्तिः प्रत्यर्थिभिः सह ॥५९॥ विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते ॥ विद्याहृद्या
पि सावद्या विना विनयसंपदम् ॥६०॥ तच्चेत्किंचिद्विना रम्यं विनोक्तिः सापि कथ्य
ते ॥ विना खलैर्विभात्येषा राजेन्द्र भवतः सभा ॥६१॥ समासोक्तिः परिस्फूर्त्तिः
प्रस्तुतेऽप्रस्तुतस्य चेत् ॥ अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः ॥६२॥ अलङ्का
रः परिकरः साभिप्राये विशेषणे ॥ हिमांशुकलितोत्तंसस्तापं हरतु वः शिवः ॥६३॥
साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः ॥ चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ॥
॥६४॥ नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयास्पदः ॥ सर्वदो माधवः पायात्स यो
गंगामदीधरत् ॥६५॥ अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना ॥ उच्चरद्भूरिकी
लालः शुशुभे वाहिनीपतिः ॥६६॥ अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया ॥

कु०७प्र

एकः कृतीशाकुन्तेषु योन्यं शक्रान्न याचते ॥६७॥ प्रस्तुतेन प्रस्तुतस्य द्योतने प्र
स्तुतांकुरः ॥ किं भृंग सत्यां मालत्यां केतक्या कंटकेद्धया ॥६८॥ पर्यायोक्तं तु ग
म्यस्य वचो भंग्यन्तराश्रयम् ॥ नमस्तस्मै कृतो येन मुधा राहुवधूकुचौ ॥६९॥
पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनम् ॥ यामि चूतलतां द्रष्टुं युवाभ्या
मास्यतामिह ॥७०॥ उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिन्दयोः ॥ कः स्व
र्धुनि विवेकस्ते पापिनो नयसे दिवम् ॥७१॥ साधु दूति पुनः साधु कर्तव्यं किम
तः परं ॥ यन्मदर्थे विलूनासि दन्तैरपि नखैरपि ॥७२॥ निन्दाया निन्दया व्य
क्तिर्व्याजनिंदेति गीयते ॥ विधे स निंद्यो यस्ते प्रागेकमेवाहरच्छिरः ॥७३॥ आ
क्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ॥ चंद्र संदर्शयात्मानमथवास्ति प्रि ५

यामुखम् ॥७४॥ निषेधाभासमाक्षेपं बुधाः केचन मन्वते ॥ नाहं दूतीस्तनो
स्तापस्तस्याः कालानलोपमः ॥७५॥ आक्षेपोन्यो विधौ व्यक्ते निषेधे च तिरो
हिते ॥ गच्छ गच्छसि चेत्कान्त तत्रैव स्याज्जनिर्मम ॥७६॥ विभावना विनापि स्या
त्कारणं कार्यजन्म चेत् ॥ अप्यलाक्षारसासिक्तं रक्तं तच्चरणद्वयम् ॥७७॥ हेतू
नामसमग्रत्वे कार्योत्पत्तिश्च सा मता ॥ अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति म
न्मथः ॥७८॥ कार्योत्पत्तिस्तृतीया स्यात्सत्यपि प्रतिबंधके ॥ नरेंद्रानेव ते राज
न्दशत्यसिभुजङ्गमः ॥७९॥ कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे ॥
हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि ॥८०॥ असंभवोर्थनिष्पत्तेरसंभा
व्यत्ववर्णनम् ॥ को वेद गोपशिशुकः शैलमुत्पाटयेदिति ॥८१॥ विरुद्धं भिन्नदे
शत्वं कार्यहेत्वोरसंगतिः ॥ विषं जलधरैः पीतं मूर्छिताः पथिकाङ्गना ॥८२॥ अ

कार

कु०१५

८

न्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तथा॥ अपारिजातां वसुधां चिकीर्षन्द्यां तथा
कृथाः॥८३॥ गोत्रोद्धारप्रवृत्तोपि गोत्रोद्वेगं पुरा करोः॥ विषमं वर्ण्यते यत्र घट
नाननुरूपयोः॥८४॥ क्वेयं शिरीषमृद्वङ्गी क्व तावन्मदनज्वरः॥ विरूपकार्यस्यो
त्पत्तिरपरं विषमं मतम्॥८५॥ कीर्तिं प्रसूते धवलां श्यामा तव कृपाणिका॥
अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात्॥८६॥ भक्ष्याशयाहिमञ्जूषां द
ष्ट्वाखुस्तेन भक्षितः॥ समं स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः॥८७॥ स्वानुरू
पं कृतं सद्म हारेण कुचमण्डलं॥ सारूप्यमपि कार्यस्य कारणेन समं विदुः॥८८॥
नम्रता नीचप्रवणता लक्ष्मि जलजायास्तवोचिता॥ विनानिष्टं च तत्सिद्धिर्यदर्थं
कर्तुमुद्यमः॥८९॥ युक्तो वारणलाभोयं स्यान्न ते वारणार्थिनः॥ विचित्रं तत्प्र
यत्नश्चेद्विपरीतफलेच्छया॥९०॥ नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिं॥

पिटारी

अधिकंपृथुलाधारादाधेयाधिक्यवर्णनम् ॥ ब्रह्मांडानि जले यत्र तत्र मांति न ते गुणाः १

पृथ्वाधेयाद्यदाधाराधिक्यं तदपि तन्मतं ॥ ९१ ॥ कियद्वाग्ब्रह्म यत्रैते विश्रा
म्यंति गुणास्तव ॥ अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता ॥ ९२ ॥ मणिमा
लोर्मिकाते द्य करेजपवलयायते ॥ अन्योन्यं नाम यत्र स्यादुपकारः परस्परं ॥ ९३ ॥
त्रियामा शशिना भाति शशी भाति त्रियामया ॥ विशेषः ख्यातमाधारं वि
नाप्याधेयवर्णनं ॥ ९४ ॥ गतेपि सूर्ये दीपस्थास्तमश्छिंदंति तत्कराः ॥ विशेषः
सोपि यद्येकं वस्त्वनेकत्र वर्ण्यते ॥ ९५ ॥ अंतर्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सै
व मे ॥ किंचिदारंभतोशक्यवस्त्वंतरकृतिश्च सः ॥ ९६ ॥ त्वां पश्यता मया लब्धं
कल्पवृक्षनिरीक्षणं ॥ व्याघातोन्यथाकारि तथाकारि क्रियेत चेत् ॥ ९७ ॥ यै
र्जगत्प्रीयते हंति तैरेव कुसुमायुधः ॥ सौकर्येण निबद्धापि क्रिया कार्यवि
धनी रोधिनी ॥ ९८ ॥ दया चेद्बाल इति मय्यपरित्याज्य एव ते ॥ गुंफः कारणमाला

कु०प्र.

८

स्याद्यथाद्याक्रनकारणे: ॥९९॥ नयेन श्रीः श्रियास्त्यागस्त्यागेन विपुलं
यशः ॥ गृहीतमुक्तरीत्यर्थश्रेणिरेकावलिर्मता ॥१००॥ नेत्रे कर्णान्तविश्रान्ते
कर्णौ दोस्तंभशालिनौ ॥ दोस्तंभौ जानुपर्यंतप्रलंबनमनोहरौ ॥१०१॥
जानुनी रत्नमुकुराकारे तस्य हि भूभुजः ॥ उत्तरोत्तरमुत्कर्षः सारः स्यान्नि
धीयते ॥ २ ॥ मधुरं मधु तस्माच्च सुधा तस्याः कवेर्वचः ॥ यथासंख्यं क्रमेणै
व क्रमिकाणां समन्वयः ॥३॥ शत्रुं मित्रं विपत्तिं च जय रंजय भंजय ॥ पर्या
यो यदि पर्यायेणैकस्यानेकसंश्रयः ॥४॥ पद्मं मुक्त्वा गता चंद्रं कामिनी वद
नप्रभा ॥ एकस्मिन्यद्यनेके वा पर्यायः सोपि संमतः ॥५॥ अधुना पुलिनं तत्र
यत्र स्रोतः पुरा जनि ॥ परिवृत्तिर्विनिमयो योर्थानां स्यात्समासमैः ॥६॥ जग्राहैकं
शरं मुक्त्वा कटाक्षात्स रिपुश्रियः ॥ परिसंख्या निषिध्यैकमेकस्मिन्वस्तुयंत्रणं ॥

स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नत
भ्रुवां ।

टा वटोसटार

विरोधेतु
ल्पवल
योर्द्विक
ल्पा१

यस्मिन्विशेषसामान्यविशेषाः सविकस्वरः॥ सनजिग्यमहान्तोहि दुर्धर्षासागराइव॥ १॥ प्रौ
ढोक्तिरुत्कर्षाहेतौतद्धेतुत्वप्रकल्पनम्॥ कचाः कलिन्दजातीरतमालस्तोममेचकाः॥ २॥ संभावने
यदीत्थंस्यादित्यूहान्यस्यसिद्धये॥ ॥ यदिशेषोनवक्ताकथिताः स्युर्गुणास्तव॥ ३॥

लंकृतिर्मता॥ ८ सद्यः शिरांसिचापाच्चानमयन्नमुर्हीभुजः॥ वहूनांयु
गपद्भावभाजांगुम्फः समुच्चयः॥ ९॥ नश्यंतिपश्चान्निश्यंतिनस्यंतिवत्तेवद्वि
षः॥ अहंप्राथमिकाभाजामेककार्यान्वयेपिसः॥ १० कुलंरूपं ८८८८
वयोविद्याधनंचमदयंत्यमुं॥ क्रमकैकगतानांतुगुंफः कारकदीप
कं॥ ११॥ गछत्यागछतिपुनः पांथः पश्यतिपृछति॥ समाधिः कार्यसौ
कार्यंकारणांतरसन्निधेः॥ उत्कंठिताचतरुणीजगामास्तंचभानुमान्॥
प्रत्यनीकंवलवतः शत्रोः पक्षेपराक्रमः॥ १३॥ जैत्रनेत्रानुगौकर्णौ॥ वु
त्पलानामधःकृतौ॥ केमृत्वनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते॥ १४
सं जितस्त्वन्मुखेनेंदुः कावार्त्तासरसीरुहां॥ समर्थनीयस्यार्थस्यका
व्यलिंगंसमर्थनं॥ १५॥ जितोसिमंदकंदर्पमच्चित्तेस्तित्रिलोचनः उक्तं त्कं

किंचिन्मिथ्यात्वसिद्ध्यर्थंमिथ्यार्थान्तरकल्पनम्॥ मिथ्याध्यवसितिर्वेश्यावशयेत्खस्त्रजंवहन्॥ ४॥
प्रस्तुतेवर्ण्यवाक्यार्थप्रतिविम्बस्यकल्पनम्॥ ललितंनिर्गतेनीरेसेतुमेषाचिकीर्षति॥ ५॥

दृ३

ठितार्थसंसिद्धिर्विनायत्नं प्रहर्षणं ॥१६॥ तामेव ध्यायते तस्मै निस्पृहा से
वदूतिका ॥ वांछितादधिकोर्थस्य संसिद्धिस्त्व प्रहर्षणं ॥१७॥ दीपमुद्योतये
द्यावत्तावदस्तमुदितो रवि: ॥ यत्नादुपायसिद्ध्यर्थात्साक्षाल्लाभ: फलस्य च
॥१८॥ निधिं जनोषधीमूलं खनिता सादितो निधि: ॥ इष्यमाणाविरुद्धा
र्थसंप्राप्तिस्तु विषादनं ॥१९॥ दीपमुद्योतये द्यावन्निर्वाणस्तावदेव स: ॥ एके
स्यागुणदोषाभ्यामुल्लासोन्यस्य तौ यदि ॥२०॥ अपि मां पावयेत्साध्वी स्ना
त्वेतीच्छति जान्हवी ॥ काप्यभिन्नं कुचयोश्चस्तुं वोच्छत्व: पृदपरया ॥२१॥
निंदंति च विधातारं लब्ध्वाटीश्रुतियोषित: ॥ तदन्यागंधधनस्येव यन्नो
श्रयति सज्जनं ॥२२॥ लाभोयमेव नृपाल सेवका नो न चेद्बुध: ता
भ्यां तौ यदि न स्यातामवज्ञालंकृतिस्तु सा ॥२३॥ स्वल्पमेवांबु लभ

गुणदोषाभ्यां कृतिर्भवति ५

दोषस्य ५

८

ते प्रस्थं प्राप्यापि सागरं ॥ मीलंति यदि पद्मानि का हानिरमृतद्युतेः दोष
स्यान्यर्थनानुज्ञा तत्रैव गुणदर्शनात् ॥ २४ ॥ विपदः संतु नः शश्वद्यासु सं
कीर्त्यते हरिः ॥ लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं ॥ २५ ॥ अखिले
षु विहंगेषु तथा स्वच्छंदचारिषु ॥ शुकपंजरबंधस्ते मधुराणां गिरां फलं
॥ २६ ॥ सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः ॥ नितंबगुर्वी तरुणी दृग्यु
ग्मविपुला च सा ॥ २७ ॥ क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः ॥ च
तुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते ॥ २८ ॥ तद्गुणः स्वगुणत्यागा
दन्यदीयगुणग्रहः ॥ पद्मरागायते नासामौक्तिकं तेधरत्विषा ॥ २९
पुनः स्वगुणसम्प्राप्तिः पूर्वरूपमुदाहृतम् ॥ हरकंठांशुलिप्तोपि
शेषस्त्वद्यशसा सितः ॥ ३० ॥ पूर्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि

ते.

मुद्रालंकारः ५

दीपे निर्वापिते प्यासीत्काश्चीरत्नैर्महन्महः ॥ ३१ ॥ संगतान्यगुणानङ्गी
कारमाहुरतद्गुणम् ॥ चिरं रागिणि मच्चित्ते निहितोपि न रज्यसि ॥ ३२ ॥
प्राक्सिद्धस्वगुणोत्कर्षो नुगुणः परसन्निधेः ॥ नीलोत्पलानि दधते क
टाक्षैरतिनीलताम् ॥ ३३ ॥ मीलितं यदि सादृश्याद्भेद एव न लक्ष्यते ॥ रसो दी० ४
नालक्षि लाक्षा चरणे सहजारुणे ॥ ३४ ॥ मल्लिकामाल्यधारिण्यः
सर्वाङ्गीणार्द्रचंदनाः ॥ क्षोमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः
॥ ३५ ॥ सामान्यं यदि सादृश्याद्विशेषो नोपलक्ष्यते ॥ पद्मकरप्रविष्टानां
मुखं नालक्षि सुभ्रुवां ॥ ३६ ॥ भेदवैशिष्ट्योः स्फूर्तावुन्मीलितविशेषकौ ॥
हिमाद्रिं त्वद्यशोमग्नं सुराः शीते न जानते ॥ ३७ ॥ लक्षितानुदिते चंद्रे
पद्मानि च मुखानि च ॥ ॥ किंचिदाकूतसहितं स्याद्गूढोत्तरमुत्तरम् ॥ ३८ ४

यत्रासौ वेतसी पांथ तत्रेयं सुतरा सरित् ॥ प्रश्नोत्तरोत्तराभिन्नमुत्तरं चित्र
मुच्यते ॥ ३९ ॥ केदारपोषणरताः के खेटाः किं चलं वयः ॥ सूक्ष्मं पराशयाभि
ज्ञेतरसाकूतचेष्टितं ॥ ४० ॥ मयि पश्यति सा केशैः सीमन्तमणिमावृणोत् ॥
पिहितं परवृत्तान्तं ज्ञातुः साकूतचेष्टितं ॥ ४१ ॥ प्रिये गृहागते प्रातः कान्ता
तल्पं समकल्पयत् ॥ व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनं ॥ ४२ ॥ सखि
पश्य गृहारामपरागैरस्मि धूसरा ॥ गूढोक्तिरन्योद्देश्यं चेद्यदन्यं प्रतिक
थ्यते ॥ ४३ ॥ वृषापेहि परक्षेत्रादायातः क्षेत्ररक्षकः ॥ विवृतोक्तिः श्लिष्ट
गुप्तं कविना विवृतं यदि ॥ ४४ ॥ वृषापेहि परक्षेत्रादिति वक्ति ससूचनं ॥ यु
क्तिः पराभिसंधानं क्रियया मर्मगुप्तये ॥ ४५ ॥ त्वामालिखन्ती दृष्ट्वान्यं
धनुः पौष्पं करे लिखत् ॥ लोकप्रवादानुकृतिर्लोकोक्तिरिति गण्यते ॥ ४६

नित्ताथीका प्रयात सुतनु वल्लिमरवे ताणुवंकाघनद्रेमन्ये वृन्दावनातेक्कनुसमूगत्रिशुनेवजानेवपुन
वालकत्रिननशैजरवरुषयतिगीपप्रवात्रवेत्रालीलासल्लापइत्यंजलनिधिहिमवत्कान्यपोस्त्रायत

स ह स्वकति चिन्मामान्मीलियित्वा विलोचने ॥ छेकोक्तिर्यत्रलोको
क्तेः स्यादर्थान्तरगर्भितो ॥ ४७ ॥ भुजङ्ग एव जानीते भुजङ्गचरणंसखे ॥
वक्रोक्तिः श्लेषकाकुभ्यामपरार्थत्वकल्पने ॥ ४८ ॥ मुंचमानं दिनं प्राप्तेने
हनन्दीहरान्तिके ॥ स्वभावोक्तिः स्वभावस्यजात्यादिस्थस्यवर्णनम्
॥ ४९ ॥ कुरङ्गैरुत्तरङ्गाक्षैस्तब्धकर्णैरुदीक्ष्यते ॥ भाविकंभूतभाव्यर्थ
साक्षात्कारस्यवर्णनम् ॥ ५० ॥ अहंविलोकयेद्यापियुध्यन्तेत्रसुरासु
राः ॥ उदात्तं वृद्धिसहितंश्लाघ्यंचान्योपलक्षणम् ॥ ५१ ॥ सानोयस्यान
वद्युद्धंतद्धूर्जटिकिरीटिनोः ॥ अत्युक्तिरद्भुततथ्यशौर्यौदार्यादिवर्णनम्
॥ ५२ ॥ अर्थदातरिराजेंद्रेयाचकाः कल्पशाखिनः ॥ निरुक्तिर्योगतोनाम्ना
मन्यार्थत्वप्रकल्पनम् ॥ ५३ ॥ ईद्दशैश्चरितैर्जानेसत्यंदोषाकरोभवान् ॥ प्र. १०

अलंकारः स्यात् २

चंद्रदत्त लोसिर